वसुधैव कुटुम्बकम्
ONE EARTH · ONE FAMILY · ONE FUTURE

# सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी

## दीक्षान्तमहोत्सवस्याधिसूचना

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य **एकचत्वारिंशत्तमो दीक्षान्तमहोत्सवः** 25.11.2023 दिनाङ्के विश्वविद्यालयस्य मुख्यभवने सम्पत्स्यते।

अस्मिन्नवसरे 2023 वर्षीयविद्यावारिध्याचार्यशास्त्रिशिक्षाशात्र्यायुर्वेदाचार्यग्रन्थालयविज्ञान-पत्रकारिताएवंजनसञ्चारविज्ञानस्नातकोत्तरपरीक्षां समुत्तीर्णेभ्यः स्नातकेभ्य उपाधयः प्रदास्यन्ते।

सम्बद्धाः स्नातका एतद्द्वारा सूच्यन्ते यद् 17.11.2023 दिनाङ्कं यावद् अधस्तनं स्वीकृतिपत्रं प्रपूर्य कुलसचिवस्य कार्यालये प्रेषयन्तु। 18.11.2023 एवं 19.11.2023 दिनाङ्कयोः 10 वादने स्वयमुपस्थाय अधोनिर्दिष्टानि प्रारूपाणि प्रपूरितानि प्रदर्श्य पञ्चाशदधिकशतद्वय- (250) रूप्यकाणि च प्रदाय परिधानवस्त्राण्युपाधींश्च लभेरन्।

**सूचना-** अत्र संलग्नं पत्रत्रयं वर्तते। तत्र प्रथमं प्रमाणपत्रं दीक्षान्तमहोत्सवे प्रवेशाय, यद् विद्यालयीयस्नातकेभ्यः प्रधानाचार्यः, स्वतन्त्रस्नातकेभ्यस्तु शास्त्रिपरीक्षान्तं स्वीकृतस्य महाविद्यालयस्य प्रधानाचार्यः, अथवा शिक्षाविभागस्य निरीक्षकः, अथवा हाईस्कूलकक्षान्तं स्वीकृतस्य विद्यालयस्य प्रधानाध्यापको यद् उत्तीर्णपरीक्षाया आवेदनपत्रं प्रेषितम् आसीत्, दास्यति। द्वितीयं पत्रं छात्रः 18.11.2023 दिनाङ्कात् पूर्वं कुलसचिवकार्यालये पूरयित्वा प्रापयिष्यति। तृतीयं पत्रं विद्यालयीयस्नातकेभ्यः प्रधानाचार्यः, स्वतन्त्रच्छात्रेभ्यश्च निर्धारितोऽधिकारी दास्यति।

**विशेषः-** स्नातकैः द्वितीयं स्वीकृतिपत्रं तृतीयञ्च कुलसचिवस्य कार्यालये 18.11.2023 दिनाङ्कात् पूर्वं प्रेषणीयम्, प्रथमञ्च सहैवानेयम्, तत् प्रदर्श्य उत्सवप्रवेशपत्रं स्नातकीयपरिधानञ्च ग्रहीतव्यम्।

02/11/2023

**कुलसचिवः**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य, वाराणसी